## सङ्ख्या वंश्येन। (१९/६७३)

विद्यया जन्मना वा प्राणिना[1]मेकलक्षणसन्तानो वंशः इत्यभिधीयते। तत्र भवो वंश्यः[2]। तद्वाचिना [3]सुबन्तेन सह सङ्ख्या[4] समस्यते, अव्ययीभाव[5]श्च समासो भवति। द्वौ मुनी व्याकरणस्य वंश्यौ द्विमुनि व्याकरणस्य। त्रिमुनि व्याकरणस्य। यदा तु विद्यया [6]तद्वतामभेदविवक्षा तदा सामानाधिकरण्यं [7]भवति। द्विमुनि व्याकरणम्। त्रिमुनि व्याकरणम् इति। [8]जन्मना—एकविंशतिभारद्वाजम्॥

## नदीभिश्च। (२०/६७४)

सङ्ख्या [9]इत्यनुवर्तते। नदीवचनैः शब्दैः सह सङ्ख्या समस्यते,[10] अव्ययीभावश्च समासो भवति। समाहारे चायमिष्यते। सप्तगङ्गम्। द्वियमुनम्। पञ्चनदम्। सप्तगोदावरम्[11]॥

## अन्यपदार्थे च सञ्ज्ञायाम्। (२१/६७५)

सङ्ख्या इति निवृत्तम्। नदीग्रहणमनुवर्तते। नदीभिः सह सुबन्त[12]मन्यपदार्थे वर्तमानं सञ्ज्ञायां [13]विषये समस्यते, अव्ययीभावश्च समासो भवति। विभाषाऽधिकारेऽपि नित्यसमास एवा[14]यम्। न हि वाक्येन सञ्ज्ञा गम्यते। उन्मत्तगङ्गम् नाम देशः। लोहितगङ्गम्। [15]शनैर्गङ्गम्। कृष्णगङ्गम्। अन्यपदार्थे इति किम्? [16]कृष्णवेण्णा। सञ्ज्ञायाम् इति किम्? शीघ्रगङ्गो देशः॥

## तत्पुरुषः। (२२/६८४)

तत्पुरुषः इति [17]सञ्ज्ञाऽधिक्रियते प्राग् बहुव्रीहेः (२.२.२३/८२९)। [18]यानित ऊर्ध्वमनुक्रमिष्यामः, [19]तत्पुरुषसञ्ज्ञास्ते [20]वेदितव्याः। वक्ष्यति, 'द्वितीया श्रितातीतपतित°' (२.१.२४/६८६)। इति। [21]कष्ट-श्रितः। पूर्वाचार्यसञ्ज्ञा [22]चेयं महती, तदङ्गीकरणमुपाधेरपि तदीयस्य [23]परिग्रहार्थम्, [24]उत्तरपदार्थप्रधानस्तत्पुरुषः (म.भा. १.३८२) इति। तत्पुरुषप्रदेशाः – 'तत्पुरुषे कृति बहुलम्' (३.३.१४/९७२) इत्येवमादयः॥

## द्विगुश्च। (२३/६८५)

[25]द्विगुश्च समासः[26] तत्पुरुषसञ्ज्ञो भवति। द्विगोस्तत्पुरुषत्वे [27]समासान्ताः प्रयोजनम् (म.भा. १.३८२)। [28]पञ्चराजम्। [29]दशराजम्। द्व्यहः। [30]त्र्यहः। पञ्चगवम्। दशगवम्॥

---

1. एकलक्षणः संतानः क.ङ.ह. 2. दिगादित्वाद् इत्यधिकम् ङ. 3. सुबन्तेन नास्ति फ.ह. 4. विभाषा इत्यधिकम् ङ. 5. °सञ्ज्ञश्च इ. 6. तद्वदताम् इ. 7. संभवति ङ.इ. 8. जन्मना नास्ति क.इ.ह. 9. इत्येव ङ. 10. विभाषा इत्यधिकम् ह. 11. कृष्णोदकपाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः। गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि॥ इत्यधिकम् ङ. 12. अन्यस्य पदस्यार्थे क.इ, अस्य पदार्थे ह, अन्यपदार्थे च ङ, अन्यपदार्थे संज्ञायां फ. 13. विषये नास्ति इ. 14. अयम् नास्ति ह. 15. तूष्णींगङ्गम् इत्यधिकम् ब.क.ङ.इ.फ, शनैर्गङ्गम् नास्ति फ. 16. कृष्णवेण्या ङ, कृष्णवेणी इ. 17. सञ्ज्ञात्वेन ह. 18. यत् इति इ. 19. तत्पुरुषसञ्ज्ञकास्ते क, तत्पुरुषसञ्ज्ञोऽसौ समासो वेदितव्यः इ. 20. समासाः इत्यधिकम् ङ. 21. कष्टं श्रितः कष्टश्रितः, नरकं श्रितः, नरकश्रितः क, नरकश्रितः ङ, नरकपतितः इ. 22. इयं फ, नास्ति ब, महतीसञ्ज्ञा ह. 23. परि-ग्रहार्थः ह. 24. उत्तरपदार्थस्तत्पुरुषः इ. 25. च नास्ति फ. 26. तत्पुरुषसञ्ज्ञकः क. 27. समासान्तः ब. 28. पञ्चराजी, दशराजी न्या, पञ्चफली, दशफली ह. 29. नास्ति इ. 30. नास्ति ब.